ॐ

# श्रीलळिताहृदयस्तोत्रं

śrīlaḻitāhṛdayastotraṁ



## श्री लळितांबिकायै नमः

śrī laḻitāṁbikāyai namaḥ

### देव्युवाच

### १ देवदेव महादेव सच्चिदानन्दविग्रहा

### सुन्दर्या हृदयं स्तोत्रं परं कौतूहलं विभो

devyuvāca
1 devadeva mahādeva saccidānandavigrahā
sundaryā hṛdayaṁ stotraṁ paraṁ kautūhalaṁ vibho

### ईश्वर उवाच

īśvara uvāca

### २ साधु साधुत्वया प्राज्ञे लोकानुग्रहकारकं

ॐ

रहस्यमपि वक्ष्यामि सावधानमनाःश्रृणु

2 sādhu sādhutvayā prājñe lokānugrahakārakaṁ
rahasyamapi vakṣyāmi sāvadhānamanāḥśṛṇu

३ श्रीविद्यां जगतां धात्रीं सर्ग्गस्थितिलयेश्वरीं

नमामि ललितां नित्यां भक्तानामिष्टदायिनीं

3 śrīvidyāṁ jagatāṁ dhātrīṁ sarggasthitilayeśvarīṁ
namāmi laḻitāṁ nityāṁ bhaktānāmiṣṭadāyinīṁ

४ बिन्दुत्रिकोणसम्युक्तं वसुकोणसमन्वितं

दशकोण द्वयोपेतं चतुर्द्दश समन्वितं

4 bindutrikoṇasamyuktaṁ vasukoṇasamanvitaṁ
daśakoṇa dvayopetaṁ caturddaśa samanvitaṁ

५ दळाष्टकेसरोपेतं दळषोडशकान्वितं

वृत्तत्रययान्वितं भूमिसदनत्रयभूषितं

5 daḻāṣṭakesaropetaṁ daḻaṣoḍaśakānvitaṁ
vṛttatrayayānvitaṁ bhūmisadanatrayabhūṣitaṁ

६ नमामि ललिताचक्रं भक्तानामिष्टदायकं

अमृतांभोनिधिं तत्र रत्नद्वीपं नमाम्यहं

6 namāmi laḻitācakraṁ bhaktānāmiṣṭadāyakaṁ
amṛtāṁbhonidhiṁ tatra ratnadvīpaṁ namāmyahaṁ

७ नानावृक्षमहोद्यानं वन्देहं कल्पवाटिकां

सन्तानवाटिकां वन्दे हरिचन्दनवाटिकां

7 nānāvṛkṣamahodyānaṁ vandehaṁ kalpavāṭikāṁ
santānavāṭikāṁ vande haricandanavāṭikāṁ

८ मन्दारवाटिकां पारिजातवाटीं मुदा भजे

नमामि तव देवेशि कदंबवनवाटिकां

8 mandāravāṭikāṁ pārijātavāṭīṁ mudā bhaje
namāmi tava deveśi kadaṁbavanavāṭikāṁ

ॐ

९ पुष्यरागमहारत्नप्राकारं प्रणमाम्यहं

पत्मरागादिमणिभिः प्राकारं सर्व्वदा भजे

9 puṣyarāgamahāratnaprākāraṁ praṇamāmyahaṁ
patmarāgādimaṇibhiḥ prākāraṁ sarvvadā bhaje

१० गोमेदरत्नप्राकारं वज्रप्राकारमाश्रये

वैडूर्यरत्नप्राकारं प्रणमामि कुळेश्वरी

10 gomedaratnaprākāraṁ vajraprākāramāśraye
vaiḍūryaratnaprākāraṁ praṇamāmi kuḻeśvarī

११ इन्द्रनीलाख्यरत्नानां प्राकारं प्रणमाम्यहं

मुक्ताफलमहारत्नप्राकारं प्रणमाम्यहं

11 indranīlākhyaratnānāṁ prākāraṁ praṇamāmyahaṁ
muktāphalamahāratnaprākāraṁ praṇamāmyahaṁ

१२ मरताख्यमहारत्नप्राकाराय नमोनमः

विद्रुमाख्यमहारत्नप्राकारं प्रणमाम्यहं

12 maratākhyamahāratnaprākārāya namonamaḥ
vidrumākhyamahāratnaprākāraṁ praṇamāmyahaṁ

१३ माणिक्यमण्डपं रत्नसहस्रस्तंभमण्डपं

लळिते तवदेवेशि भजाम्यमृतवापिकां

13 māṇikyamaṇḍapaṁ ratnasahasrastaṁbhamaṇḍapaṁ
laḻite tavadeveśi bhajāmyamṛtavāpikāṁ

१४ आनन्दवापिकां वन्देविमर्शवापिकां भजे

भजे बालातपोल्गारं चन्द्रिकोगारिकां भजे

14 ānandavāpikāṁ vandevimarśavāpikāṁ bhaje
bhaje bālātapolgāraṁ candrikogārikāṁ bhaje

१५ महाश्रृंगारपरिखां महापत्माटवीं भजे

चिन्तामणि महारत्नगृहराजं नमाम्यहं

15 mahāśṛṁgāraparikhāṁ mahāpatmāṭavīṁ bhaje

cintāmaṇi mahāratnagṛharājaṁ namāmyahaṁ

१६ पूर्वांनायमयं पूर्व्वद्वारं देवि नमाम्यहं

दक्षिणांनायरूपंते दक्षिणद्वारमाश्रये

16 pūrvāṁnāyamayaṁ pūrvvadvāraṁ devi namāmyahaṁ
dakṣiṇāṁnāyarūpaṁte dakṣiṇadvāramāśraye

१७ नमामि पश्चिमद्वारं पश्चिमाम्नाय रूपकं

वन्देहमुत्तरद्वारमुत्तराम्नाय रूपकं

17 namāmi paścimadvāraṁ paścimāmnāya rūpakaṁ
vandehamuttaradvāramuttarāmnāya rūpakaṁ

१८ ऊर्द्ध्वाम्नायमयं वन्दे ह्यूर्द्धद्वारं कुळेश्वरि

लळिते तव देवेशि महासिंहासनं भजे

18 ūrddhvāmnāyamayaṁ vande hyūrddhadvāraṁ kuḻeśvari
laḻite tava deveśi mahāsiṁhāsanaṁ bhaje

१९ ब्रह्मात्मकं मञ्चपादमेकं तव नमाम्यहं

एकं विष्णुमयं मञ्चपादमन्यं नमाम्यहं

19 brahmātmakaṁ mañcapādamekaṁ tava namāmyahaṁ
ekaṁ viṣṇumayaṁ mañcapādamanyaṁ namāmyahaṁ

२० एकं रुद्रमयं मञ्चपादमन्यं नमाम्यहं

मञ्चपादं ममाम्येकं तव देवीश्वरात्मकं

20 ekaṁ rudramayaṁ mañcapādamanyaṁ namāmyahaṁ
mañcapādaṁ mamāmyekaṁ tava devīśvarātmakaṁ

२१ मञ्चैकफलकं वन्दे सदाशिवमयं शुभं

नमामिते हंसतूलतल्पकं परमेश्वरी

21 mañcaikaphalakaṁ vande sadāśivamayaṁ śubhaṁ
namāmite haṁsatūlatalpakaṁ parameśvarī

२२ नमामिते हंसतूलमहोपाधानमुत्तमं

कौस्तुभास्तरणं वन्दे तव नित्यं कुळेश्वरी

ॐ

22 namāmite haṁsatūlamahopādhānamuttamaṁ
kaustubhāstaraṇaṁ vande tava nityaṁ kuḻeśvarī

२३ महावितानिकां वन्दे महायविनिकां भजे

एवं पूजागृहं ध्यात्वा श्रीचक्रे श्रीशिवां भजे

23 mahāvitānikāṁ vande mahāyavinikāṁ bhaje
evaṁ pūjāgṛhaṁ dhyātvā śrīcakre śrīśivāṁ bhaje

२४ स्वदक्षिणे स्थापयामि भागे पुष्पाक्षतादिकान्

अमितांस्ते महादेवि दीपान् सन्दर्शयाम्यहं

24 svadakṣiṇe sthāpayāmi bhāge puṣpākṣatādikān
amitāṁste mahādevi dīpān sandarśayāmyahaṁ

२५ मूलेन त्रिपुराचक्रं तव संपूज्ययाम्यहं

त्रिभिः खण्डैस्तवख्यातैः पूजयामि महेश्वरि

25 mūlena tripurācakraṁ tava saṁpūjyayāmyahaṁ
tribhiḥ khaṇḍaistavakhyātaiḥ pūjayāmi maheśvari

२६ वाय्वग्नि जलसम्युक्तं प्राणायामैरहं शिवै

शोषाणां दाहनं चैव करोमि प्लावनं तथा

26 vāyvagni jalasamyuktaṁ prāṇāyāmairahaṁ śivai
śoṣāṇāṁ dāhanaṁ caiva karomi plāvanaṁ tathā

२७ त्रिवारं मूलमन्त्रेण प्राणायामं करोम्यहं

पाषण्डकारिणो भूता भूमौये चान्तरिक्षके

27 trivāraṁ mūlamantreṇa prāṇāyāmaṁ karomyahaṁ
pāṣaṇḍakāriṇo bhūtā bhūmauye cāntarikṣake

२८ करोम्यनेन मन्त्रेण ताळत्रयमहं शिवे

नारायणोहं ब्रह्माहं भैरवोहं शिवोस्म्यहं

28 karomyanena mantreṇa tāḻatrayamahaṁ śive
nārāyaṇohaṁ brahmāhaṁ bhairavohaṁ śivosmyahaṁ

२९ देवोहं परमानन्दोस्म्यहं त्रिपुरसुन्दरि

ध्यात्वा वै वज्रकवचं न्यासं तव करोम्यहं

29 devohaṁ paramānandosmyahaṁ tripurasundari
dhyātvā vai vajrakavacaṁ nyāsaṁ tava karomyahaṁ

३० कुमारीबीजसम्युक्तं महात्रिपुरसुन्दरि

मां रक्षरक्षेति हृदि करोम्यञ्जलिमीश्वरि

30 kumārībījasamyuktaṁ mahātripurasundari
māṁ rakṣarakṣeti hṛdi karomyajñalimīśvari

३१ महादेव्यासनायेति प्रकरोम्यासनं शिवे

चक्रासनं नमस्यामि सर्व्वमन्त्रासनं शिवे

31 mahādevyāsanāyeti prakaromyāsanaṁ śive
cakrāsanaṁ namasyāmi sarvvamantrāsanaṁ śive

३२ साद्ध्यसिद्धासनं मन्त्रैरेभिर्युक्तं महेश्वरि

करोम्यस्मिन् चक्रमन्त्रैर्देवतासनमुत्तमं

32 sāddhyasiddhāsanaṁ mantrairebhiryuktaṁ maheśvari
karomyasmin cakramantrairdevatāsanamuttamaṁ

३३ करोम्यथ षडंगाख्यं मातृकां च कलां न्यसे

श्रीकण्टं केशवं चैव प्रपञ्चं योगमातृकां

33 karomyatha ṣaḍaṁgākhyaṁ mātṛkāṁ ca kalāṁ nyase
śrīkaṇṭaṁ keśavaṁ caiva prapañcaṁ yogamātṛkāṁ

३४ तत्वन्यासं ततः कूर्व्वे चतुष्पीटं यथाचरे

लघुषोढां ततः कूर्व्वे शक्तिन्यासं महोत्तमं

34 tatvanyāsaṁ tataḥ kūrvve catuṣpīṭaṁ yathācare
laghuṣoḍhāṁ tataḥ kūrvve śaktinyāsaṁ mahottamaṁ

३५ पीटन्यासं ततः कुर्वे देवतावाहनं प्रिये

कुंकुमन्यासकं चैव चक्रन्यासमथाचरे

35 pīṭanyāsaṁ tataḥ kurve devatāvāhanaṁ priye
kuṁkumanyāsakaṁ caiva cakranyāsamathācare

३६ चक्रन्यासं ततः कुर्व्वे न्यासं कामकलाद्वयं

षोडशार्ण्णमहामन्त्रैरंगन्यासं करोम्यहं

36 cakranyāsaṁ tataḥ kurvve nyāsaṁ kāmakalādvayaṁ
ṣoḍaśārṇṇamahāmantrairaṁganyāsaṁ karomyahaṁ

३७ महाषोढां ततः कुर्व्वे शांभवं च महाप्रिये

ततोमूलं प्रजप्त्वाथ पादुकाञ्च ततः परं

37 mahāṣoḍhāṁ tataḥ kurvve śāṁbhavaṁ ca mahāpriye
tatomūlaṁ prajaptvātha pādukāñca tataḥ paraṁ

३८ गुरवे सम्यगर्च्याथ देवतां हृदिसंभजे

करोमि मण्डलं वृत्तं चतुरश्रं शिवप्रिये

38 gurave samyagarcyātha devatāṁ hṛdisaṁbhaje
karomi maṇḍalaṁ vṛttaṁ caturaśraṁ śivapriye

३९ पुष्पैरभ्यर्च्च्यसाधारं शंखं संपूजयामहं

अर्च्चयामि षडंगेन जलमापूरयाम्यहं

39 puṣpairabhyarccyasādhāraṁ śaṁkhaṁ saṁpūjayāmahaṁ
arccayāmi ṣaḍaṁgena jalamāpūrayāmyahaṁ

४० ददामि चादिमं बिन्दुं कुर्वे मूलाभिमन्त्रितं

तजजलेन जगन्मातस्त्रिकोणं वृत्तसम्युतं

40 dadāmi cādimaṁ binduṁ kurve mūlābhimantritaṁ
tajajalena jaganmātastrikoṇaṁ vṛttasamyutaṁ

४१ षळ्कोणं चतुरश्रञ्च मण्डलं प्रणमाम्यहं

विद्यया  पूजयामीह त्रिखण्डेन तु पूजनं

41 ṣaḻkoṇaṁ caturaśrañca maṇḍalaṁ praṇamāmyahaṁ
vidyayā  pūjayāmīha trikhaṇḍena tu pūjanaṁ

४२ बीजेनवृत्तषळ्कोणं पूजयामि तवप्रिये

तस्मिन् देवीकलात्मानां मणिमण्डलमाश्रये

42 bījenavṛttaṣaḻkoṇaṁ pūjayāmi tavapriye

ॐ

tasmin devīkalātmānāṁ maṇimaṇḍalamāśraye

४३ धूम्रार्च्चिषं नमस्यामि ऊष्मां च ज्वलनीं तथा

ज्वालिनीं च नमस्यामि वन्देहं विस्पुलिंगिनीं

43 dhūmrārccișaṁ namasyāmi ūṣmāṁ ca jvalanīṁ tathā
jvālinīṁ ca namasyāmi vandehaṁ vispuliṁginīṁ

४४ सुश्रियं च सुरूपाञ्चकंपिलां प्रणमाम्यहं

नौमि हव्यवहां नित्यां भजे कव्यवहां कलां

44 suśriyaṁ ca surūpāñcakaṁpilāṁ praṇamāmyahaṁ
naumi havyavahāṁ nityāṁ bhaje kavyavahāṁ kalāṁ

४५ सूर्याग्निमण्डलां तत्र सकलाद्वादशात्मकं

अर्घ्यपाद्यमहं तत्र तपिनीं तापिनीं भजे

45 sūryāgnimaṇḍalāṁ tatra sakalādvādaśātmakaṁ
arghyapādyamahaṁ tatra tapinīṁ tāpinīṁ bhaje

४६ धूम्रां मरीचीं वन्देहं ज्वालिनीं मरुहं भजे

सुषुम्नां भोगदां वन्दे भजे विश्वां च बोधिनीं

46 dhūmrāṁ marīcīṁ vandehaṁ jvālinīṁ maruhaṁ bhaje
suṣumnāṁ bhogadāṁ vande bhaje viśvāṁ ca bodhinīṁ

४७ धारिणीं च क्षमां वन्दे सौरीरेताः कलाभजे

आश्रये मण्मलं चान्द्रं तल्कलाषोडशात्मकं

47 dhāriṇīṁ ca kṣamāṁ vande saurīretāḥ kalābhaje
āśraye maṇmalaṁ cāndraṁ talkalāṣoḍaśātmakaṁ

४८ अमृतां मानदां वन्दे पूषां तुष्टीं भजाम्यहं

पुष्टिं भजे महादेवि भजेहं च रतिं धृतिं

48 amṛtāṁ mānadāṁ vande pūṣāṁ tuṣṭīṁ bhajāmyahaṁ
puṣṭiṁ bhaje mahādevi bhajehaṁ ca ratiṁ dhṛtiṁ

४९ रशनिं चन्द्रिकां वन्दे कान्तीं जोत्सना श्रियं भजे

नेमिप्रीतिश्चागतदाश्चपूर्णिमाममृतां भजे

ॐ

49 raśanim̐ candrikām̐ vande kāntīm̐ jotsanā śriyam̐ bhaje
neaumiprītiñcāgatadāñcapūrṇṇimāmamṛtām̐ bhaje

५० त्रिकोणलेखनं कुर्व्वे आकारादिसुरेखकं

हळक्षवर्ण्णसम्युक्तं स्पीतं तं हंसभास्करं

50 trikoṇalekhanam̐ kurvve ākārādisurekhakam̐
haḻakṣavarṇṇasamyuktam̐ spītam̐ tam̐ ham̐sabhāskaram̐

५१ वाक्कामशक्ति संयुक्तं हंसमाराधयाम्यहं

वृत्ताद्बहिःषडश्रस्य लेखनं प्रकरोम्यहं

51 vākkāmaśakti sam̐yuktam̐ ham̐samārādhayāmyaham̐
vṛttādbahiḥṣaḍaśrasya lekhanam̐ prakaromyaham̐

५२ पुरतोग्न्यादिषळ्ख़ोणं कखगेनार्च्चयाम्यहं

श्रीविद्यया सप्तवारं करोम्यत्राभि मन्त्रितं

52 puratognyādiṣaḻkhoṇam̐ kakhagenārccayāmyaham̐
śrīvidyayā saptavāram̐ karomyatrābhi mantritam̐

५३ समर्प्पयामि देवेशि तस्माल् गन्धाक्षतादिकं

ध्यायामि पूजाद्रव्येषु तल् सर्व्वं विद्ययायुतं

53 samarppayāmi deveśi tasmāl gandhākṣatādikam̐
dhyāyāmi pūjādravyeṣu tal sarvvam̐ vidyayāyutam̐

५४ चतुर्न्नवतिसन्मन्त्रान् स्पृष्ट्वा तल् प्रजपाम्यहं

वह्नेर्द्दशकलाः सूर्यकलाद्वादशकं भजे

54 caturnnavatisanmantrān spṛṣṭvā tal prajapāmyaham̐
vahnerddaśakalāḥ sūryakalādvādaśakam̐ bhaje

५५ आश्रये शोडषकलास्तत्र चन्द्रमसस्तदा

सृष्टिम् वृद्धिम् स्मृतिम् वन्दे मेधाम् कान्तेम् तथैव च

55 āśraye śoḍaṣakalāstatra candramasastadā
sṛṣṭim vṛddhim smṛtim vande medhām kānteem tathaiva ca

५५ लक्ष्मीं द्युतिं स्थितां वन्दे स्थितिं सिद्धिं भजाम्यहं

एता ब्रह्मकलावन्दे जरान्तां पालिनीं भजे

56 lakṣmīṁ dyutiṁ sthitāṁ vande sthitiṁ siddhiṁ bhajāmyahaṁ
etā brahmakalāvande jarāntāṁ pālinīṁ bhaje

५७ शान्तिं नमामीश्वरीं च रतीं वन्दे च कारिकां

वरदां ह्ळादिनीं वन्दे प्रीतिं दीर्घां भजाभम्यहं

57 śāntiṁ namāmīśvarīṁ ca ratīṁ vande ca kārikāṁ
varadāṁ hḻādinīṁ vande prītiṁ dīrghāṁ bhajābhamyahaṁ

५८ एता विष्णुकलावन्दे तीक्षणां रौद्रिं भयां भजे

निद्रां तन्द्रीं क्षुधां वन्दे नमामि क्रोधिनीं क्रियां

58 etā viṣṇuakalāvande tīkṣaṇāṁ raudriṁ bhayāṁ bhaje
nidrāṁ tandrīṁ kṣudhāṁ vande namāmi krodhinīṁ kriyāṁ

५९ उल्कारीं मृत्युरूपां च एता रुद्रकला भजे

नीलां पीतां भजे श्वेतां वन्देहमरुणां कलां

59 ulkārīṁ mṛtyurūpāṁ ca etā rudrakalā bhaje
nīlāṁ pītāṁ bhaje śvetāṁ vandehamaruṇāṁ kalāṁ

६० अनन्तख्यां कलाञ्चेति ईश्वरस्य कलाभजे

निवृत्तिञ्चप्रतिष्ठाञ्चविद्यां शान्तिं भजाम्यहं

60 anantakhyāṁ kalāñceti īśvarasya kalābhaje
nivṛttiñcapratiṣṭhāñcavidyāṁ śāntiṁ bhajāmyahaṁ

६१ रोधिकां दीपिकां वन्दे रेचिकां मोचिकां भजे

परां सूक्षामृतां सूक्षां प्रणामि कुळेश्वरि

61 rodhikāṁ dīpikāṁ vande recikāṁ mocikāṁ bhaje
parāṁ sūkṣāmṛtāṁ sūkṣāṁ praṇāmi kuḻeśvari

६२ ज्ञानाख्याञ्चनमस्यामि नौमिज्ञानामृतां कलां

आप्यायिनीं व्यापिनीं च मोदिनीं प्रणमाम्यहं

62 jñānākhyāñcanamasyāmi naumijñānāmṛtāṁ kalāṁ
āpyāyinīṁ vyāpinīṁ ca modinīṁ praṇamāmyahaṁ

ॐ

६३ कलाः सदाशिवस्यैताः षोडश प्रणमाम्यहं

विष्णुयोनिं नमस्यामि मूलविद्यां नमाम्यहं

63 kalāḥ sadāśivasyaitāḥ ṣoḍaśa praṇamāmyahaṁ
viṣṇuyoniṁ namasyāmi mūlavidyāṁ namāmyahaṁ

६४ त्रैयंबकम् नमस्यामि तद्विष्णुम् प्रणमाम्यहम्

विष्णुयोनिम् नमस्यामि मूलविद्याम् नमाम्यहम्

64 traiyaṁbakam namasyāmi tadviṣṇum praṇamāmyaham
viṣṇuyonim namasyāmi mūlavidyām namāmyaham

६५ अमृतं मन्त्रितं वन्दे चतुर्न्नवतिभिस्तथा

अखण्डैकरसानन्दकरे परसुधात्मनि

65 amṛtaṁ mantritaṁ vande caturnnavatibhistathā
akhaṇḍaikarasānandakare parasudhātmani

६६ स्वच्छन्दस्पपुरणं मन्त्रं नीधेहि कुळरूपिणि

अकुळस्थामृताकारे सिद्धिज्ञानकरेपरे

66 svacchandaspapuraṇaṁ mantraṁ nīdhehi kuḻarūpiṇi
akuḻasthāmṛtākāre siddhijñānakarepare

६७ अमृतं निधेह्यस्मिन् वस्तुनिक्ळिन्नरूपिणि

तद्रूपाणेकरस्यत्वं कृत्वाह्येतल् स्वरूपिणि

67 amṛtaṁ nidhehyasmin vastunikḻinnarūpiṇi
tadrūpāṇekarasyatvaṁ kṛtvāhyetal svarūpiṇi

६८ भूत्वा परामृताकारमयि चिल् स्पुरणं कुरु

एभिर्म्मनूत्तमैर्वन्दे मन्त्रितं परमामृतं

68 bhūtvā parāmṛtākāramayi cil spuraṇaṁ kuru
ebhirmmanūttamairvande mantritaṁ paramāmṛtaṁ

६९ जोतिम्मयमिदं वन्दे परमर्घ्यञ्च सुन्दरि

तद्बिन्दुभिर्मे शिरसि गुरुं सन्तर्प्पयाम्यहं

69 jotimmayamidaṁ vande paramarghyañca sundari

tadvindubhirme śirasi guruṁ santarppayāmyahaṁ

## ७० ब्रह्मास्मिन् तद्विन्दुं कुण्डलिन्यां जुहोम्यहं

## हृच्चक्रस्तां-महादेवीं महात्रिपुरसुन्दरीं

70 brahmāsmin tadvinduṁ kuṇḍalinyāṁ juhomyahaṁ
hṛccakrastāṁ-mahādevīṁ mahātripurasundarīṁ

## ७१ निरस्तमोहतिमिरां साक्षाल् संविल् स्वरूपिणीं

## नासापुटाल् परकलामथनिर्ग्गमयाम्यहं

71 nirastamohatimirāṁ sākṣāl saṁvil svarūpiṇīṁ
nāsāpuṭāl parakalāmathanirggamayāmyahaṁ

## ७२ नमामियोनिमद्ध्यास्थां त्रिखण्डकुसुमांञ्जलिं

## जगन्मातर्महादेवि यन्त्रेत्वां स्थापयाम्यहं

72 namāmiyonimaddhyāsthāṁ trikhaṇḍakusumāṁñjaliṁ
jaganmātarmahādevi yantretvāṁ sthāpayāmyahaṁ

## ७३ सुधाचैतन्यमूर्त्तीं ते कल्पयामिमनुं तव

## अनेनदेवि मन्त्रयन्त्रेत्वां स्थापयाम्यहं

73 sudhācaitanyamūrttīṁ te kalpayāmimanuṁ tava
anenadevi mantrayantretvāṁ sthāpayāmyahaṁ

## ७४ महापत्मवनान्तस्थे कारणानन्तविग्रहे

## सर्वभूतहिते मातरेह्यपि परमेश्वरि

74 mahāpatmavanāntasthe kāraṇānantavigrahe
sarvabhūtahite mātarehyapi parameśvari

## ७५ देवेशी भकतसुलभे सर्व्वाभरणभूषिते

## यावत्वं पूजयामीहतावत्त्वं सुस्थिराभव

75 deveśī bhakatasulabhe sarvvābharaṇabhūṣite
yāvatvaṁ pūjayāmīhatāvattvaṁ susthirābhava

## ७६ अनेन मन्त्रयुग्मेन त्वामत्रावाहयाम्यहं

## कल्पयामि नमः पादमर्घ्यं ते कल्पयाम्यहं

76 anena mantrayugmena tvāmatrāvāhayāmyahaṁ
kalpayāmi namaḥ pādamarghyaṁ te kalpayāmyahaṁ

७७ गन्धतैलाभ्यञ्जनञ्चमज्जशालाप्रवेशं

कल्पयामि नमस्तस्मै मणिपीठोप्रवेशनं

77 gandhatailābhyañjanañcamajjaśālāpraveśaṁ
kalpayāmi namastasmai maṇipīṭhopraveśanaṁ

७८ दिव्यस्नानीयमीशानि गृहाणोद्वर्त्तनं शुभे

गृहाणोष्णादकस्नानं कल्पयाम्यभिषेचनं

78 divyasnānīyamīśāni gṛhāṇodvarttanaṁ śubhe
gṛhāṇoṣṇādakasnānaṁ kalpayāmyabhiṣecanaṁ

७९ हेमकुंभायुतैः स्निग्द्धैः कल्पयाम्यभिषेचनं

कल्पयामि नमस्तुभ्यं धतेन परिमार्ज्जनं

79 hemakuṁbhāyutaiḥ snigddhaiḥ kalpayāmyabhiṣecanaṁ
kalpayāmi namastubhyaṁ dhaeautena parimārjjanaṁ

८० बालभानु प्रतीकाशं दुकूलं परिधानकं

अरुणेन दुकुलेनोत्तरीयं कल्पयाम्यहं

80 bālabhānu pratīkāśaṁ dukūlaṁ paridhānakaṁ
aruṇena dukulenottarīyaṁ kalpayāmyahaṁ

८१ प्रवेशनं कल्पयामि सर्वांगानि विलेपनं

नमस्ते कल्पयाम्यत्र मणिपीठोपवेशनं

81 praveśanaṁ kalpayāmi sarvāṁgāni vilepanaṁ
namaste kalpayāmyatra maṇipīṭhopaveśanaṁ

८२ अष्टगन्धैः कल्पयामि तवलेखनमंबिके

काळागरुमहाधूपं कल्पयामि नमश्शिवे

82 aṣṭagandhaiḥ kalpayāmi tavalekhanamaṁbike
kāḷāgarumahādhūpaṁ kalpayāmi namaśśive

८३ मल्लिकामालातीजाति चंपकादि मनोरमैः

ॐ

अर्च्चितां कुसुमैर्म्मालां कल्पयामि  नमश्शिवे

83 mallikāmālātījāti caṁpakādi manoramaiḥ
arccitāṁ kusumairmmālāṁ kalpayāmi  namaśśive

८४ प्रवेशनं कल्पयामि नमो भूषणमण्डपे

उपवेश्यं रत्नपीठे तत्रते कल्पयाम्यहं

84 praveśanaṁ kalpayāmi namo bhūṣaṇamaṇḍape
upaveśyaṁ ratnapīṭhe tatrate kalpayāmyahaṁ

८५ नवमाणिक्यमकुटं तत्रते कल्पयाम्यहं

शरच्चन्द्रनिभं युक्तं तच्चन्द्रशकलं तव

85 navamāṇikyamakuṭaṁ tatrate kalpayāmyahaṁ
śaraccandranibhaṁ yuktaṁ taccandraśakalaṁ tava

८६ तत सीमन्तसिन्दूरं कस्तूरीतिलकं तव

काळाञ्जनं कल्पयामि पाळीयुगळमुत्तमं

86 tata sīmantasindūraṁ kastūrītilakaṁ tava
kāḻājñanaṁ kalpayāmi pāḻīyugaḻamuttamaṁ

८७ मणिकुण्डलयुग्मञ्च नासाभरणमीश्वरी

ताटङ्कयुगळं देवि ललिते धारयाम्यहं

87 maṇikuṇḍalayugmañca nāsābharaṇamīśvarī
tāṭaṅkayugaḻaṁ devi laḻite dhārayāmyahaṁ

८८ अथाद्यां भूषणं कण्ठे महाचिन्ताकमुत्तमं

पदकं ते कल्पयामि महापदकमुत्तमं

88 athādyāṁ bhūṣaṇaṁ kaṇṭhe mahācintākamuttamaṁ
padakaṁ te kalpayāmi mahāpadakamuttamaṁ

८९ मुक्तावलीं कल्पयामि चैकावलि समन्वितां

छन्नवीरञ्च केयूरयुगळानां चतुष्टयं

89 muktāvalīṁ kalpayāmi caikāvali samanvitāṁ
channavīrañca keyūrayugaḻānāṁ catuṣṭayaṁ

९० वलयावलिमालानीं चोर्मिकावलिमीश्वरि

काञ्चीदामकटीसूत्रं सौभग्याभरणं च ते

90 valayāvalimālānīṁ cormikāvalimīśvari
kāñcīdāmakaṭīsūtraṁ saubhagyābharaṇaṁ ca te

९१ त्रिपुरे पादकटकं कल्पये रत्ननूपुरं

पादांगुलीयकं तुभ्यं पाशमेकं करेतव

91 tripure pādakaṭakaṁ kalpaye ratnanūpuraṁ
pādāṁgulīyakaṁ tubhyaṁ pāśamekaṁ karetava

९२ अन्ये करेङ्कुशं देवि पूण्ड्रेक्षुधनुषं तव

अपरे पुष्पबाणञ्च श्रीमन्माणिक्यपादुके

92 anye kareṅkuśaṁ devi pūṇḍrekṣudhanuṣaṁ tava
apare puṣpabāṇañca śrīmanmāṇikyapāduke

९३ तदावरण देवेशि महामञ्चादिरोहणं

कामेश्वराङ्कपर्यङ्कमुपवेशनमुत्तमं

93 tadāvaraṇa deveśi mahāmañcādirohaṇaṁ
kāmeśvarāṅkaparyaṅkamupaveśanamuttamaṁ

९४ सुधया पूर्ण्णचषकं ततस्तल् पानमुत्तमं

कर्प्पूरवीटिकां तुभ्यं कल्पयामि नमः शिवे

94 sudhayā pūrṇṇacaṣakaṁ tatastal pānamuttamaṁ
karppūravīṭikāṁ tubhyaṁ kalpayāmi namaḥ śive

९५ आनन्दोल्लासविलसद्धंसं ते कल्पयाम्यहं

मंगळारात्रिकं वन्दे छत्रं ते कल्पयाम्यहं

95 ānandollāsavilasaddhaṁsaṁ te kalpayāmyahaṁ
maṁgaḻārātrikaṁ vande chatraṁ te kalpayāmyahaṁ

९६ चामरं यूगळं देविदर्प्पणं कल्पयाम्यहं

तालव्रिन्तं कल्पयामिगन्धपुष्पाक्षतैरपि

96 cāmaraṁ yūgaḻaṁ devidarppaṇaṁ kalpayāmyahaṁ

tālavrintaṁ kalpayāmigandhapuṣpākṣatairapi

९७ धूपं दीपश्चनैवेद्यं कल्पयामि शिवप्रिये

अथाहं बैन्दवे चक्रे सर्वानन्दमयात्मके

97 dhūpaṁ dīpaścanaivedyaṁ kalpayāmi śivapriye
athāhaṁ baindave cakre sarvānandamayātmake

९८ रत्नसिंहासने रम्ये समासीनां शिवप्रियां

उद्यद्भानुसहस्राभां जपापुष्पसमप्रभां

98 ratnasiṁhāsane ramye samāsīnāṁ śivapriyāṁ
udyadbhānusahasrābhāṁ japāpuṣpasamaprabhāṁ

९९ नवरत्नप्रभायुक्तमकुटेन विराजितां

चन्द्ररेखासमोपेतां कस्तूरितिलकाङ्कितां

99 navaratnaprabhāyuktamakuṭena virājitāṁ
candrarekhāsamopetāṁ kastūritilakāṅkitāṁ

१०० कामकोदण्डसौन्दर्यनिर्जितभ्रौलतायुतां

अञ्जनाञ्चितनेत्रान्तु पत्मपत्रनिभेषणां

100 kāmakodaṇḍasaundaryanirjjitabhraūlatāyutāṁ
añjanāñcitanetrāntu patmapatranibheṣaṇāṁ

१०१ मणिकुण्डलसम्युक्त कर्ण्णद्वयविराजितां

तांबूलपूरितमुखीं सुस्मितास्यविराजितां

101 maṇikuṇḍalasamyukta karṇṇadvayavirājitāṁ
tāṁbūlapūritamukhīṁ susmitāsyavirājitāṁ

१०२ आद्यभूषणसम्युक्तां हेमचिन्ताकसंयुतां

पदकेन समोपेतां महापदकसंयुतां

102 ādyabhūṣaṇasamyuktāṁ hemacintākasaṁyutāṁ
padakena samopetāṁ mahāpadakasaṁyutāṁ

१०३ मुक्ताफलसमोपेतामेकावलिसमन्वितां

कौसुभांगदसंयुक्तचतुर्‌आहुसमन्वितां

ॐ

103 muktāphalasamopetāmekāvalisamanvitāṁ
kausubhāṁgadasaṁyuktacaturāhusamanvitāṁ

१०४ अष्टगन्धसमोपेतां श्रीचन्दनविराजितां

हेमकुंभोपमप्रख्यस्तनद्वन्द्वविराजितां

104 aṣṭagandhasamopetāṁ śrīcandanavirājitāṁ
hemakuṁbhopamaprakhyastanadvandavirājitāṁ

१०५ रक्तवस्त्रपरीधानां रक्तकञ्चुकसंयुतां

सूक्ष्मरोमावलियुक्ततनुमध्यविराजितां

105 raktavastraparīdhānāṁ raktakañcukasaṁyutāṁ
sūkṣmaromāvaliyuktatanumaddhyavirājitāṁ

१०६ मुक्तामाणिक्यखचित काञ्चीयुतनितंबनीं

सदाशिवाङ्कस्थबृहन्महाजघनमण्डलां

106 muktāmāṇikyakhacita kāñcīyutanitaṁbanīṁ
sadāśivāṅakasthabṛhanmahājaghanamaṇḍalāṁ

१०७ कदळिस्तंभसंराजदूरुद्वयविराजितां

कपालीकान्तिसंकाशजंघायुगळशोभितां

107 kadaḻistaṁbhasaṁrājadūrudvayavirājitāṁ
kapālīkāntisaṁkāśajaṁghāyugaḻaśobhitāṁ

१०८ ग्रूढगुल्फद्वेयोपेतां रक्तपादसमन्वितां

ब्रह्मविष्णुमहेशादिकिरीटस्फूर्जितांघ्रिकां

108 grūḍhagulphadveyopetāṁ raktapādasamanvitāṁ
brahmaviṣṇumaheśādikirīṭasphūrjjitāṁghrikāṁ

१०९ कान्त्या विराजितपदां भक्तत्राण परायणां

इक्षुकार्मुकपुष्पेषुपाशाङ्कुशधरां शुभां

109 kāntyā virājitapadāṁ bhaktatrāṇa parāyaṇāṁ
ikṣukārmukapuṣpeṣupāśāṅkuśadharāṁ śubhāṁ

ॐ

११० संविल् स्वरूपिणीं वन्दे ध्यायामि परमेश्वरीं

प्रदर्शयाम्यथशिवे दशामुद्राः फलप्रदाः

110 saṁvil svarūpiṇīṁ vande dhyāyāmi parameśvarīṁ
pradarśayāmyathaśive daśāmudrāḥ phalapradāḥ

१११ त्वां तर्प्पयामि  त्रिपुरे त्रिधना पार्व्वति

अग्न महेशदिग्भागे नैरृत्यां मारुते तथा

111 tvāṁ tarppayāmi  tripure tridhanā pārvvati
agnaeau maheśadigbhāge nairṛtryāṁ mārute tathā

११२ इन्द्राशावारुणी भागे षडंगान्यर्च्चये क्रमाल्

आद्यां कामेश्वरीं वन्दे नमामि भगमालिनीं

112 indrāśāvāruṇī bhāge ṣaḍaṁgānyarccaye kramāl
ādyāṁ kāmeśvarīṁ vande namāmi bhagamālinīṁ

११३ नित्यक्लिन्नां नमस्यामि भेरुण्डां प्रणमाम्यहं

वह्निवासां नमस्यामि महाविद्येश्वरीं भजे

113 nityaklinnāṁ namasyāmi bheruṇḍāṁ praṇamāmyahaṁ
vahnivāsāṁ namasyāmi mahāvidyeśvarīṁ bhaje

११४ शिवदूतिं नमस्यामि त्वरितां कुळ सुन्दरीं

नित्यां नीलपताकाञ्च विजयां सर्व्वमंगळां

114 śivadūtiṁ namasyāmi tvaritāṁ kuḻa sundarīṁ
nityāṁ nīlapatākāñca vijayāṁ sarvvamaṁgaḻāṁ

११५ ज्वालामालाञ्च चित्राञ्च महानित्यां च संस्तुवे

प्रकाशानन्दनाथाख्यां पराशक्तिनमाम्यहं

115 jvālāmālāñca citrāñca mahānityāṁ ca saṁstuve
prakāśānandanāthākhyāṁ parāśaktinamāmyahaṁ

११६ शुक्ळदेवीं नमस्यामि प्रणमामि कुळेश्वरीं

परशिवानन्दनाथाख्यां पराशक्ति नमाम्यहं

116 śukḻadevīṁ namasyāmi praṇamāmi kuḻeśvarīṁ

ॐ

paraśivānandanāthākhyāṁ parāśakti namāmyahaṁ

११७ कौळेश्वरानन्दनाथं नौमि कामेश्वरीं  सदा

भोगानन्दं नमस्यामि सिद्धौघञ्च वरानने

117 kauḻeśvarānandanāthaṁ naumi kāmeśvarīṁ  sadā
bhogānandaṁ namasyāmi siddhaughañca varānane

११८ क्लिन्नानन्दं नमस्यामि समयानन्दमेवच

सहजानन्दनाथञ्च प्रणमामि मुर्म्मुहु

118 kḻinnānandaṁ namasyāmi samayānandamevaca
sahajānandanāthañca praṇamāmi murmmuhu

११९ मानवौघं नमस्यामि गगनानन्दगप्यहं

विश्वानन्दं नमस्यामि विमलानन्दमेवच

119 mānavaughaṁ namasyāmi gaganānandagapyahaṁ
viśvānandaṁ namasyāmi vimalānandamevaca

१२० मदनानन्दनाथञ्च भुवनानन्दरूपिणीं

लीलानन्दं नमस्यामि स्वात्मानन्दं महेश्वरि

120 madanānandanāthañca bhuvanānandarūpiṇīṁ
līlānandaṁ namasyāmi svātmānandaṁ maheśvari

१२१ प्रणमामिप्रियानन्दं सर्व्वकामफलप्रदं

परमेष्टिगुरुं वन्दे परमंगुरुमाश्रये

121 praṇamāmipriyānandaṁ sarvvakāmaphalapradaṁ
parameṣṭigurumṁ vande paramaṁgurumāśraye

१२२ श्रीगुरुं प्रणमस्यामि मूर्द्ध्नि ब्रह्मबिलेश्वरीं

श्रीमदानन्दनाथाख्यश्रिगुरो पादुकां तथा

122 śrīguruṁ praṇamasyāmi mūrddhni brahmabileśvarīṁ
śrīmadānandanāthākhyaśriguro pādukāṁ tathā

१२३ अथ प्राथमिके देवि चतुरश्रे कुळेश्वरि

अणिमां लखिमां वन्दे महिमां प्रणमाम्यहं

ॐ

123 atha prāthamike devi caturaśre kuḻeśvari
aṇimāṁ lakhimāṁ vande mahimāṁ praṇamāmyahaṁ

१२४ ईशित्वसिद्धिं कलये वशित्वं प्रणमाम्यहं

प्राकाम्यसिद्धिं भुक्तिञ्च इच्छाप्राप्तिमहं भजे

124 īśitvasiddhiṁ kalaye vaśitvaṁ praṇamāmyahaṁ
prākāmyasiddhiṁ bhuktiñca icchāprāprtimahaṁ bhaje

१२५ सर्व्वकामप्रदां सर्व्वकामसिद्धिमहं भजे

मद्ध्यमे चतुरश्रेहं ब्राह्मीं माहेश्वरीं भजे

125 sarvvakāmapradāṁ sarvvakāmasiddhimahaṁ bhaje
maddhyame caturaśrehaṁ brāhmīṁ māheśvarīṁ bhaje

१२६ कौमारीं वैष्णवीं वन्दे वाराहीं प्रणमाम्यहं

माहेन्द्रीमपिचामुण्डां महालक्ष्मीमहं भजे

126 kaumārīṁ vaiṣṇavīṁ vande vārāhīṁ praṇamāmyahaṁ
māhendrīmapicāmuṇḍāṁ mahālakṣmīmahaṁ bhaje

१२७ तृतीये चतुरश्रे तु सर्व्वसंक्षोभिणीं भजे

सर्व्वविद्राविणीं मुद्रां सर्व्वाकर्षिणिकां भजे

127 tṛtīye caturaśre tu sarvvasaṁkṣobhiṇīṁ bhaje
sarvvavidrāpiṇīṁ mudrāṁ sarvvākarṣiṇikāṁ bhaje

१२८ मुद्रां वशङ्करीं वन्दे सर्व्वोन्मादिनिकां भजे

भजे महाङ्कुशां मुद्रां खेचरीं प्रणमाम्यहं

128 mudrāṁ vaśaṅkarīṁ vande sarvvonmādinikāṁ bhaje
bhaje mahāṅkuśāṁ mudrāṁ khecarīṁ praṇamāmyahaṁ

१२९ बीजामुद्रां योनिमुद्रां भजे सर्व्वत्रिखण्डिनीं

त्रैलोक्यमोहनं चक्रं नमामि लळिते तव

129 bījāmudrāṁ yonimudrāṁ bhaje sarvvatrikhaṇḍinīṁ
trailokyamohanaṁ cakraṁ namāmi laḻite tava

१३० नमामि योगिनीं तत्र प्रखटाख्यामभीष्टदां

ॐ

सुधार्ण्णवासनं वन्दे तत्र ते परमेश्वरि

130 namāmi yoginīṁ tatra prakhaṭākhyāmabhīṣṭadāṁ
sudhārṇṇavāsanaṁ vande tatra te parameśvari

१३१ चक्रेश्वरि महं वन्दे त्रिपुरां प्रणमाम्यहं

सर्व्वसंक्षोभिणीं मुद्रां ततोहं कलये शिवे।

131 cakreśvari mahaṁ vande tripurāṁ praṇamāmyahaṁ
sarvvasaṁkṣobhiṇīṁ mudrāṁ tatohaṁ kalaye śive।

१३२ अथाहं षोडशदळे कामाकर्षिणिकां भजे

बुद्ध्याकर्षिणिकां वन्देहङ्काराकर्षिणिकां भजे

132 athāhaṁ ṣoḍaśadaḻe kāmākarṣiṇikāṁ bhaje
buddhyākarṣiṇikāṁ vandehaṅkārākarṣiṇikāṁ bhaje

१३३ शब्दाकर्षिणिकां वन्दे स्पर्शाकर्षिणिकां भजे

रूपाकर्षिणिकां वन्दे रसाकर्षिणिकां भजे

133 śabdākarṣiṇikāṁ vande sparśākarṣiṇikāṁ bhaje
rūpākarṣiṇikāṁ vande rasākarṣiṇikāṁ bhaje

१३४ गन्धाकर्षिणिकां वन्दे चित्ताकर्षिणिकां भजे

धैर्याकर्षिणिकां वन्दे स्मृत्याकर्षिणिकां भजे

134 gandhākarṣiṇikāṁ vande cittākarṣiṇikāṁ bhaje
dhairyākarṣiṇikāṁ vande smṛtyākarṣiṇikāṁ bhaje

१३५ नामाकर्षिणिकां वन्दे बीजाकर्षिणिकां भजे

आत्माकर्षिणिकां वन्दे अमृताकर्षिणिकां भजे

135 nāmākarṣiṇikāṁ vande bījākarṣiṇikāṁ bhaje
ātmākarṣiṇikāṁ vande amṛtākarṣiṇikāṁ bhaje

१३६ शरीराकर्षिणिकां वन्दे नित्यां श्रीपरमेश्वरि

सर्व्वाशापूरकं वन्दे कल्पयेहं तवेश्वरि

136 śarīrākarṣiṇikāṁ vande nityāṁ śrīparameśvari
sarvvāśāpūrakaṁ vande kalpayehaṁ taveśvari

ॐ

१३७ गुप्ताख्यां योगिनीं वन्दे मातरं गुप्तपूज्यतां

पोतांबुजासनं तत्र नमामि लळिते तव

137 guptākhyāṁ yoginīṁ vande mātaraṁ guptapūjyatāṁ
potāṁbujāsanaṁ tatra namāmi laḻite tava

१३८ त्रिपुरेशीं नमस्यामि भजामिष्टार्त्थसिद्धिदां

सर्व्वविद्राविणिमुद्रां तत्राहं ते विचन्तये

138 tripureśīṁ namasyāmi bhajāmiṣṭārtthasiddhidāṁ
sarvvavidrāviṇimudrāṁ tatrāhaṁ te vicantaye

१३९ शिवे तवाष्टपत्रेहमनंगकुसुमां भजे

अनंगमेखलां वन्दे अनंगमदनां भजे

139 sive tavāṣṭapatrehamanaṁgakusumāṁ bhaje
anaṁgamekhalāṁ vande anaṁgamadanāṁ bhaje

१४० नमोहं प्रणस्यामि अनंगमदनातुरां

अनंगरेखां कलये भजेनंगां च वेगिनीं

140 namohaṁ praṇasyāmi anaṁgamadanāturāṁ
anaṁgarekhāṁ kalaye bhajenaṁgāṁ ca veginīṁ

१४१ अनंगाकुशां वन्देह मनंगमालिनीं भजे

तत्राहं प्रणस्यामि देव्या आसनमुत्तमं

141 anaṁgākuśāṁ vandeha manaṁgamālinīṁ bhaje
tatrāhaṁ praṇasyāmi devyā āsanamuttamaṁ

१४२ नमामि जगतीशानीं तत्र त्रिपुरसुन्दरीं

सर्व्वाकर्षिणिकां मुद्रां तत्राह कलपयामिते

142 namāmi jagatīśānīṁ tatra tripurasundarīṁ
sarvvākarṣiṇikāṁ mudrāṁ tatrāha kalapayāmite

१४३ भुवनाश्रये तव शिवे सर्व्वसंक्षोभिणीं भजे

सर्व्वविद्राविणीं वन्दे सर्व्वकर्षिणिकां भजे

143 bhuvanāśraye tava śive sarvvasaṁkṣobhiṇīṁ bhaje

sarvvavidrāviṇīṁ vande sarvvakarṣiṇikāṁ bhaje

१४४ सर्व्वह्ळादिनीं वन्दे सर्व्वसम्मोहिनीं भजे

सकल स्तंभिनीं वन्दे कलये सर्व्वजृंभिणीं

144 sarvvahḻādinīṁ vande sarvvasammohinīṁ bhaje
sakala staṁbhinīṁ vande kalaye sarvvajṛṁbhiṇīṁ

१४५ वशङ्करीं नमस्यामि सर्व्वरञ्जिनिकां भजे

सकलोन्मदिनीं वन्दे भजे सर्व्वार्त्थसाधके

145 vaśaṅkarīṁ namasyāmi sarvvarajñinikāṁ bhaje
sakalonmadinīṁ vande bhaje sarvvārtthasādhake

१४६ संपत्तिपुरिकां वन्दे सर्व्वमन्त्रमयीं भजे

भजाम्येव ततश्शक्तिं सर्व्वद्वन्द्वक्ष्यङ्करीं

146 saṁpattipurikāṁ vande sarvvamantramayīṁ bhaje
bhajāmyeva tataśśaktiṁ sarvvadvandvakṣyaṅkarīṁ

१४७ तत्राहं कलये चक्रं सर्व्वसौभाग्यदायकं

नमामि जगतां धात्रीं संप्रदायाख्ययोगिनिं

147 tatrāhaṁ kalaye cakraṁ sarvvasaubhāgyadāyakaṁ
namāmi jagatāṁ dhātrīṁ saṁpradāyākhyayoginiṁ

१४८ नमामि परमेशानीं महात्रिपुरवासिनिं

कलयेहं तव शिवे मुद्रां सर्व्वशङ्करीं

148 namāmi parameśānīṁ mahātripuravāsiniṁ
kalayehaṁ tava śive mudrāṁ sarvvaśaṅkarīṁ

१४९ बहिर्द्दशारे ते देवि सर्व्वसिद्धिप्रदां भजे

सर्व्वसंपल् प्रदां वन्दे सर्व्वप्रियंकरीं भजे

149 bahirddaśāre te devi sarvvasiddhipradāṁ bhaje
sarvvasaṁpal pradāṁ vande sarvvapriyaṁkarīṁ bhaje

१५० नमाम्यहं ततो देवीं सर्व्वमंगळकारिणीं

सर्व्वकामप्रदां वन्दे सर्व्वदुःखविमोचिनिं

150 namāmyahaṁ tato devīṁ sarvvamaṁgaḻakāriṇīṁ
sarvvakāmapradāṁ vande sarvvaduḥkhavimociniṁ

१५१ सर्व्वमृत्युप्रशमनीं सर्व्वविघ्ननिवारिणीं

सर्व्वांगसुन्दरीं वन्दे सर्व्वसौभाग्यदायिनीं

151 sarvvamṛtyupraśamanīṁ sarvvavighnanivāriṇīṁ
sarvvāṁgasundarīṁ vande sarvvasaubhāgyadāyinīṁ

१५२ सर्व्वार्त्थसाधकं चक्रं तत्राहं ने विचिन्तये

तत्राहं ते नमस्यामि कुळोत्तीर्णाख्य योगिनीं

152 sarvvārtthasādhakaṁ cakraṁ tatrāhaṁ ne vicintaye
tatrāhaṁ te namasyāmi kuḻottīrṇākhya yoginīṁ

१५३ सर्व्वमन्त्रसनं वन्दे त्रिपुराश्रियमाश्रये

कलयामि ततो मुद्रां सर्व्वोन्मादन कारिणीं

153 sarvvamantrasanaṁ vande tripurāśriyamāśraye
kalayāmi tato mudrāṁ sarvvonmādana kāriṇīṁ

१५४ अन्तर्द्दशारे ते देवि सर्वज्ञां प्रणमाम्यहं

सर्व्वशक्तिं नमस्यामि सर्व्वैश्वर्यप्रदां भजे

154 antarddaśāre te devi sarvajñāṁ praṇamāmyahaṁ
sarvvaśaktiṁ namasyāmi sarvvaiśvaryapradāaṁ bhaje

१५५ सर्व्वज्ञानमयीं वन्दे सर्व्वव्याधिविनाशिनीं

सर्व्वाधारस्वरूपाञ्च सर्व्वपापहरांभजे

155 sarvvajñānamayīṁ vande sarvvavyādhivināśinīṁ
sarvvādhārasvarūpāñca sarvvapāpaharāṁbhaje

१५६ सर्वानन्दमयिं वन्दे सर्व्वरक्षास्वरूपिणीं

प्रणमामि महादेवीं सर्व्वेप्सित फलप्रदां

156 sarvānandamayiṁ vande sarvvarakṣāsvarūpiṇīṁ
praṇamāmi mahādevīṁ sarvepsita phalapradāṁ

१५७ सर्व्वरक्षाकरं चक्रं सुन्दरीं कलये सदा

निगर्भयोनीं वन्दे तत्राहं प्रणमाम्यहं

157 sarvvarakṣākaraṁ cakraṁ sundarīṁ kalaye sadā
nigarbhayonīṁ vande tatrāhaṁ praṇamāmyahaṁ

१५८ साद्ध्यसिद्धासनं वन्दे भजे त्रिपुरमालिनीं

कलयामि ततो देवीं मुद्रां सर्व्वमहाङ्कुशां

158 sāddhyasiddhāsanaṁ vande bhaje tripuramālinīṁ
kalayāmi tato devīṁ mudrāṁ sarvvamahāṅkuśāṁ

१५९ अष्टारे वशिनीं वन्दे महा कामेश्वरीं भजे

मोदिनीं विमलांवन्दे अरुणाजयिनीं भजे

159 aṣṭāre vaśinīṁ vande mahā kāmeśvarīṁ bhaje
modinīṁ vimalāṁvande aruṇājayinīṁ bhaje

१६० सर्वेश्वरीं नमस्यामि कौळिनीं प्रणमाम्यहं

सर्वरोगहरं चक्रं तत्राहं कलये सदा

160 sarveśvarīṁ namasyāmi kauḻinīṁ praṇamāmyahaṁ
sarvarogaharaṁ cakraṁ tatrāhaṁ kalaye sadā

१६१ नमामि त्रिपुरा सिद्धिं भजे मुद्रां च खेचरीं

महात्रिकोणवल् बाहुचतुरश्रे कुळेश्वरि

161 namāmi tripurā siddhiṁ bhaje mudrāṁ ca khecarīṁ
mahātrikoṇaval bāhucaturaśre kuḻeśvari

१६२ नमामि जृंभणाबाणं सर्व्वसंमोहिनीं भजे

पाशं चापं भजे नित्यं भजे स्तंभनमङ्कुशं

162 namāmi jṛṁbhaṇābāṇaṁ sarvvasaṁmohinīṁ bhaje
pāśaṁ cāpaṁ bhaje nityaṁ bhaje staṁbhanamaṅkuśaṁ

१६३ त्रिकोणेहं जगद्धात्रीं महाकामेश्वरीं भजे

महावज्रेश्वरीं वन्दे महाश्रीभगमालिनीं

163 trikoṇehaṁ jagaddhātrīṁ mahākāmeśvarīṁ bhaje
mahāvajreśvarīṁ vande mahāśrībhagamālinīṁ

ॐ

१६४ महाश्रीसुन्दरीं वन्दे सर्व्वकामफलप्रदां

सर्व्वसिद्धिप्रदं चक्रं तवदेवि नमाम्यहं

164 mahāśrīsundarīṁ vande sarvvakāmaphalapradāṁ
sarvvasiddhipradaṁ cakraṁ tavadevi namāmyahaṁ

१६५ नमाम्यतिरहस्याख्यां योगिनीं तवकामदां

त्रिपुरांबां नमस्यामि बीजामुद्रामहांभजे

165 namāmyatirahasyākhyāṁ yoginīṁ tavakāmadāṁ
tripurāṁbāṁ namasyāmi bījāmudrāmahāṁbhaje

१६६ मूलमन्त्रेण लळिते तल्बिन्दौ पूजयाम्यहं

सर्वानन्दमयं चक्रं तवदेवि भजाम्यहं

166 mūlamantreṇa laḻite talbindau pūjayāmyahaṁ
sarvānandamayaṁ cakraṁ tavadevi bhajāmyahaṁ

१६७ परां पररहस्याख्यां योगिनीं तत्रकामदां

महाचक्रेश्वरीं वन्दे योनिमुद्रामहं भजे

167 parāṁ pararahasyākhyāṁ yoginīṁ tatrakāmadāṁ
mahācakreśvarīṁ vande yonimudrāmahaṁ bhaje

१६८ धूपदीपादिकं सर्वमर्प्पितं कल्पयाम्यहं

त्वल्प्रीतये महामुद्रां दर्शयामि ततश्शिवे

168 dhūpadīpādikaṁ sarvamarppitaṁ kalpayāmyahaṁ
tvalprītaye mahāmudrāṁ darśayāmi tataśśive

१६९ शाल्यन्नं मधुसम्युक्तं पायसापूप सम्युक्तं

घृतसूपसमायुक्तं दधिक्षीरसमन्वितं

169 śālyannaṁ madhusamyuktaṁ pāyasāpūpa samyuktaṁ
ghṛtasūpasamāyuktaṁ dadhikṣīrasamanvitaṁ

१७० सर्व्वभक्ष्यसमायुक्तं बहुशाकसमन्वितं

निक्षिप्य काञ्चने पात्रे नैवेद्यं कल्पयामि ते

170 sarvvabhakṣyasamāyuktaṁ bahuśākasamanvitaṁ

nikṣipya kāñcane pātre naivedyaṁ kalpayāmi te

१७१ सङ्कल्पबिन्दुना चक्रं कुचौ बिन्दुद्वयेन च

योनिश्च सपरार्द्धेन कृत्वा श्रीलळिते तव

171 saṅkalpabindunā cakraṁ kucau bindudvayena ca
yoniśca saparārddhena kṛtvā śrīlaḻite tava

१७२ एतल् कामकला रूपं भक्तानां सर्व्वकामदं

सर्व्वसौभाग्यदं वन्दे तत्र त्रिपुरसुन्दरीं

172 etal kāmakalā rūpaṁ bhaktānāṁ sarvvakāmadaṁ
sarvvasaubhāgyadaṁ vande tatra tripurasundarīṁ

१७३ वामभागे महेशानि वृत्तं च चतुश्रकं

कृत्वा गन्धाक्षताद्यैश्चाप्यर्च्चयामि महेश्वरीं

173 vāmabhāge maheśāni vṛttaṁ ca catuśrakaṁ
kṛtvā gandhākṣatādyaiścāpyarccayāmi maheśvarīṁ

१७४ वाग्दवाद्यं नमस्यामि तत्र व्यापकमण्डलं

जलयुक्तेन पाणौ च शुद्धमुद्रा समन्वितं

174 vāgdavādyaṁ namasyāmi tatra vyāpakamaṇḍalaṁ
jalayuktena pāṇau ca śuddhamudrā samanvitaṁ

१७५ तत्र मन्त्रेण दास्यामि देवि ते बलिमुत्तमं

नमस्ते देवदेवेशि नम स्त्रैलोक्यवन्दिते

175 tatra mantreṇa dāsyāmi devi te balimuttamaṁ
namaste devadeveśi nama strailokyavandite

१७६ नमश्शिववराङ्कस्थे नमस्त्रीपुरसुन्दरि

प्रदक्षिणनमस्कार मनेनाहं करोमि ते

176 namaśśivavarāṅkasthe namastrīpurasundari
pradakṣiṇanamaskāra manenāhaṁ karomi te

१७७ तत सङ्कल्पमन्त्राणां समाजं परमेश्वरि

प्रजपामि महाविद्यां त्वल् प्रीत्यर्थमहं शिवे

ॐ

177 tata saṅkalpamantrāṇāṁ samājaṁ parameśvari
prajapāmi mahāvidyāṁ tval prītyartthamahaṁ śive

१७८ तव विद्यां प्रजप्त्वाथ नौमि त्वां परमेश्वरि

महादेवि महेशानि महाशिवमये प्रिये

178 tava vidyāṁ prajaptvātha naumi tvāṁ parameśvari
mahādevi maheśāni mahāśivamaye priye

१७९ महानित्ये महासिद्धे त्वामहं शरणं शिवे

जयत्वं त्रिपुरे देवि ललिते परमेश्वरि

179 mahānitye mahāsiddhe tvāmahaṁ śaraṇaṁ śive
jayatvaṁ tripure devi laḻite parameśvari

१८० सदाशिव प्रियङ्करि पाहिमां करुणानिधे

जगन्मातर्ज्जगद्रूपे जगदीश्वरवल्लभे

180 sadāśiva priyaṅkari pāhimāṁ karuṇānidhe
jaganmātarjjagadrūpe jagadīśvaravallabhe

१८१ जगन्मयि जगल् स्तुत्ये गौरि त्वामहमाश्रये

अनाद्ये सर्व्वलोकानामाद्ये भक्तेष्टदायिनि

181 jaganmayi jagal stutye gauri tvāmahamāśraye
anādye sarvvalokānāmādye bhakteṣṭadāyini

१८२ गिरिराजेन्द्रतनये नमस्तीपुरसुन्दरि

जयारीञ्जयदेवेशि ब्रह्ममातर्महेश्वरि

182 girirājendratanaye namastīpurasundari
jayārīñjayadeveśi brahmamātarmaheśvari

१८३ विष्णुमातरमाद्यन्ते हरमातस्सुरेश्वरि

ब्रह्म्यादि मातृसंस्तुत्ये सर्व्वाभरण सम्युक्ते

183 viṣṇumātaramādyante haramātassureśvari
brahmyādi mātṛsaṁstutye sarvvābharaṇa samyukte

१८४ ज्योतिर्मयि महारूपे पाहिमां त्रिपुरे सदा

ॐ

लक्ष्मीवाण्यादि सं पूज्ये ब्रह्मविष्णुशिवप्रिय

184 jyotirmayi mahārūpe pāhimāṁ tripure sadā
lakṣmīvāṇyādi saṁ pūjye brahmaviṣṇuśivapriya

१८५ भजामि तव पादाब्जं देवि त्रिपुरसुन्दरि

त्वल्प्रीत्यर्त्थं यतः काञ्चीच्छक्तिं वैपूजयाम्यहं

185 bhajāmi tava pādābjaṁ devi tripurasundari
tvalprītyartthaṁ yataḥ kāñcīcchaktiṁ vaipūjayāmyahaṁ

१८६ ततश्च केतनां शक्तिं तर्पयामि महेश्वरि

तथापि त्वां भजंस्तोषं चिदग्नौ च ददाम्यहं

186 tataśca ketanāṁ śaktiṁ tarpayāmi maheśvari
tathāpi tvāṁ bhajaṁstoṣaṁ cidagnau ca dadāmyahaṁ

१८७ त्वल्प्रीत्यर्त्थयं महादेवि ममाभीष्टार्त्थ सिद्धये

बद्ध्वा त्वां खैचरीमुद्रां क्षमस्वोद्वासयाम्यहं

187 tvalprītyartthayaṁ mahādevi mamābhīṣṭārttha siddhaye
baddhvā tvāṁ khaicarīmudrāṁ kṣamasvodvāsayāmyahaṁ

१८८ तिष्तमे हृदयेनित्यं त्रिपुरे परमेश्वरि

जगदं महाराज्ञि महाशक्ति शिवप्रिये

188 tiṣtame hṛdayenityaṁ tripure parameśvari
jagadaṁ mahārājñi mahāśakti śivapriye

१८९ हृच्चक्रे तिष्तमे नित्यं महात्रिपुरसुन्दरि

एतल् त्रिपुरसुन्दर्या हृदयं सर्वकामदं

189 hṛccakre tiṣtame nityaṁ mahātripurasundari
etal tripurasundaryā hṛdayaṁ sarvakāmadaṁ

१९० महारहस्यं सततं दुर्ल्लभं दैवतैरपि

साक्षाल् सदाशिवेनोक्तं गुह्याल् गुह्यमनुत्तमं

190 mahārahasyaṁ satataṁ durllabhaṁ daivatairapi
sākṣāl sadāśivenoktaṁ guhyāl guhyamanuttamaṁ

ॐ

१९१ यः पतेल् श्रद्धया नित्यं श्रृणुयाद्वा समाहितः

नित्यपूजाफलं देव्यास्सलभेन्नात्र संशयः

191 yaḥ patel śraddhayā nityaṁ śṛṇuyādvā samāhitaḥ
nityapūjāphalaṁ devyāssalabhennātra saṁśayaḥ

१९२ पापैः समुच्यते सद्यः कायवाक्क् सित्तसंभवैः

पूर्वजन्म समुल् भ्रदतैर्ज्ञानाज्ञकृतैरपि

192 pāpaiḥ samucyate sadyaḥ kāyavākk sittasaṁbhavaiḥ
pūrvajanma samul bhradatairjñānājñakṛtairapi

१९३ सर्वक्रतुषुयल् पुण्यं सर्वतीर्त्थेषु यर्फलं

तल् पुण्यं लभते नित्यं मानवो नात्र संशयः

193 sarvakratuṣuyal puṇyaṁ sarvatīrttheṣu yarphalaṁ
tal puṇyaṁ labhate nityaṁ mānavo nātra saṁśayaḥ

१९४ अचलां लभते लक्ष्मीं त्रैलोक्येनाति दुर्लभां

साक्षाद्विष्णुर्महालक्ष्या शीघ्रमेव भविष्यति

194 acalāṁ labhate lakṣmīṁ trailokyenāti durlabhāṁ
sākṣādviṣṇurmahālakṣyā śīghrameva bhaviṣyati

१९५ अष्टैश्वर्य मवाप्नोति स शीघ्रं मानवोत्तमः

घण्डिकापादुकासिद्ध्यादिष्टकं शीघ्रमश्नुते

195 aṣṭaiśvarya mavāpnoti sa śīghraṁ mānavottamaḥ
ghaṇḍikāpādukāsiddhyādiṣṭakaṁ śīghramaśnute

श्रीमल् त्रिपुरांबिकायै नमः

śrīmal tripurāṁbikāyai namaḥ

श्रीलळिता हृदयस्तोत्रं संपूर्णं

śrīlaḻitā hṛdayastotraṁ saṁpūrṇaṁ

ॐ तल् सल्

om tal sal

Please send any corrections/suggestion on this document to menonar@yahoo.com